# Prahladakritam Nrisimha Stotram

# પ્રહ્લાદકૃતં નૃસિંહસ્તોત્રમ્

## Document Information

Text title : Prahladakritam Nrisimha Stotram

File name : prahlAdakRRitaMnRRisiMhastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra, dashAvatAra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 140/81-103||

Latest update : December 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2025

*sanskritdocuments.org*

# પ્રહ્લાદકૃતં નૃસિંહસ્તોત્રમ્

નૃસિંહં હૃદ્યે ધ્યાત્વાઽસ્તૌષીદ્ધરિં સમાહિતઃ ।
નમો દેવાધિદેવાય સત્ત્વવિલીનમૂર્તયે ॥ ૮૧॥

બ્રહ્માદયો બિભ્યતિ યદ્રૂપાત્તદ્રૂપિણે નમઃ ।
ધનાઽભિજનસૌન્દર્યતપઃશ્રુતબલાદિભિઃ ॥ ૮૨॥

સ્મૃદ્ધિવાક્પટુતાભિશ્ચાઽતુષ્યતે તે નમો નમઃ ।
તવાઽઙ્ઘ્રિવિમુખો વિપ્રો યમૈશ્ચ નિયમૈર્યુતઃ ॥ ૮૩॥

ભક્તશ્ચાદાત્ કનીયાન્સ ભક્તહૃષ્ટાય તે નમઃ ।
માનહીનાય દીનાય તુષ્યતે તે નમો નમઃ ॥ ૮૪॥

ભક્તિમાર્ગાશ્રિતસૌખ્યકર્ત્રે તે હરયે નમઃ ।
રક્ષાવિભૂતિસમ્પત્સુસૌખ્યદાત્રે પુનર્નમઃ ॥ ૮૫॥

બ્રહ્માદયોઽપિ દેવાશ્ચ શાન્તદર્શનકાઙ્ક્ષિણઃ ।
સ્તુવન્તિ ત્વાં પરાત્માનં શાન્તરૂપં તતઃ કુરુ ॥ ૮૬॥

નાઽહં બિભૈમિ દેવેશ ક્રૂરાન્નૃસિંહરૂપણાત્ ।
બિભેમિ કામરોષાદેસ્તતો રક્ષાં વિધેહિ મે ॥ ૮૭॥

અસુરાદ્રક્ષણાં તત્તુ દેહસ્ય રક્ષણં કૃતમ્ ।
તદ્ધૈ મે રક્ષણં નાસ્તિ તસ્માન્મદ્રક્ષણં કુરુ ॥ ૮૮॥

ક્લેશકર્મવિપાકાદેરજાયા બન્ધનાત્ ખલુ ।
રક્ષણં કુરુ વિશ્વેશ તન્મતં રક્ષણં ભવેત્ ॥ ૮૯॥

ઈહાઃ પુત્રકલત્રાદેર્ધનૈશ્વર્યદિવસ્પતેઃ ।
કદાપિ નૈવ પૂર્યન્તે તાભ્યો મે રક્ષણં કુરુ ॥ ૯૦॥

દૈત્યેન્દ્રસ્ય મયા દૃષ્ટાઃ સ્મૃદ્ધયસ્તા ન રક્ષિકાઃ ।
ઐશ્વર્યાણિ મયા દૃષ્ટાન્યેતાન્યવન્તિ નૈવ હિ ॥ ૯૧॥

સિદ્ધયશ્ચાપિ દેવાનાં રક્ષાં કુર્વન્તિ નૈવ ચ ।
ભક્તાનાં ત્વં રક્ષણાય બહુરૂપી ભવસ્યથ ॥ ૯૨॥

ઉદ્ધારયસિ વિશ્વાત્મન્ તથોદ્ધારં ચ મે કુરુ ।
રાજ્યં તુ બન્ધનં પ્રોક્તં પાપં પાપતરં મહત્ ॥ ૯૩॥

યત્સતાં સેવને વિઘ્નં માનસત્તાદિદૂષણૈઃ ।
દીનત્વે તપ આસ્થાય વાઞ્છન્તિ કામનામયાન્ ॥ ૯૪॥

ભોગાનાસાદ્ય પશ્ચાત્ત્વાં વિસ્મરન્તીતિ કિલ્બિષમ્ ।
તતો દેવાધિદેવત્વં દારાસત્તાધનાદિષુ ॥ ૯૫॥

મા યોગં મે દેહિ નાથ દેહિ ત્વચ્ચરણામ્બુજે ।
તવ દાસસ્ય દાસાનાં મધ્યે યોગં પ્રદેહિ મે ॥ ૯૬॥

ઇમે દેવાસ્તવ રૂપં સૌમ્યં કાઙ્ક્ષન્તિ દર્શને ।
તસ્માત્સૌમ્યં સુખદં વૈ રૂપં દર્શય માધવ ॥ ૯૭॥

ઇત્યર્થિતઃ સ ભગવાન્ તેજસ્તદતિભીષણમ્ ।
રોષાન્વિતં તુ સંહૃત્ય બભૂવ સુખદર્શનઃ ॥ ૯૮॥

શરત્કોટીન્દુસઙ્કાશઃ પુણ્ડરીકનિભેક્ષણઃ ।
સુધામયસટાપુઞ્જવિદ્યુત્કોટિનિભપ્રભઃ ॥ ૯૯॥

સદ્રત્નાઢ્યકટકકેયૂરોર્મિકાદિભૂષિતઃ ।
શઙ્ખચક્રગૃહીતાભ્યામુદ્બાહુભ્યાં વિરાજિતઃ ॥ ૧૦૦॥

વરદાઽભયહસ્તાભ્યામિતરાભ્યાં સુશોભિતઃ ।
શ્રીવત્સકૌસ્તુભોરસ્કો વનમાલાવિભૂષિતઃ ॥ ૧૦૧॥

કુણ્ડલહારરશનામણિસ્વર્ણવિરાજિતઃ ।
સવ્યાઙ્ગસ્થશ્રિયા યુક્તોઽભવત્તદા નૃકેસરી ॥ ૧૦૨॥

લક્ષ્મીનૃસિંહં તં દૃષ્ટ્વા દેવતાઃ સમહર્ષયઃ ।
આનન્દાશ્રુજલૈઃ સિક્ત્વા નમશ્ચક્રુર્નિરન્તરમ્ ॥ ૧૦૩॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૧૪૦-અધ્યાયાન્તર્ગતં
પ્રહ્લાદકૃતં નૃસિંહસ્તોત્રં

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૧૪૦/૮૧-૧૦૩॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 140/81-103..

Proofread by PSA Easwaran

*Prahladakritam Nrisimha Stotram*
pdf was typeset on December 25, 2025

Please send corrections to *sanskrit@cheerful.com*